# अर्जुनकिरातयोः युद्धम् |

## नामधातु

भारविकविना विरचितं “किरातार्जुनीयम्” इति महाकाव्यं |अस्याः आधारभूता अस्ति एका प्रसिद्धा कथा महाभारते | कौरवपाण्डवयोः द्यूतक्रीडानन्तरं पराजिताः पाण्डवाःअरण्ये निवसन्ति | दुर्योधनस्तु इन्द्रप्रस्थे **राजायते** |

युधिष्ठिरेण प्रेषितः किरातः दुर्योधनस्य राज्यभारक्रमं ज्ञात्वा, प्रत्यागत्य युधिष्ठिरं सर्वम् **अर्थापयति** | “दुर्योधनः नीतिपूर्वकं राज्यशासनं कृत्वा प्रबलः महाराजः इति कीर्तिं **कामयते** | अतः तं जेतुं कोऽपि उपायः कर्तव्यः “ इति किरातः वदति | धर्मराजः तस्मै उचितं पारितोषिकं दत्वा प्रेषयति |

धर्मराजः अनन्तरं भीमादीनां सम्मुखं द्रौपद्यै सर्वं विवृणोति | द्रौपदी तेषां पूर्वतनं जीवनं स्मृत्वा **दुःखायते बाष्पायते** च | “युद्धाय सिद्धतां करोतु भवान्” इति युधिष्ठिरं सा भणति | भीमः अपि स्वाभिप्रायं प्रकटयति | भीमः अग्रजस्य शान्तिमार्गाचरणं **प्रतिकूलयति** यतः सः दुर्योधनं प्रति **दुर्मनायते** | किन्तु धर्मराजः भीमम् उपदेशं करोति |

तस्मिन्नेव समये व्यासमुनिः पाण्डवानाम् आश्रमं प्राविशत् | युधिष्ठिरः तं दृष्ट्वा **हर्षायते** | “भवतः आगमनेन अस्माकं जन्म सफ़लञ्जातम् | आगमनकारणं न अपृच्छम् | किन्तु भवतः वचनं श्रोतुमिच्छामि” इति अवदत् | एतत् श्रुत्वा व्यासः **मद्रायते** |

व्यासः अवदत् “ दुर्योधनः शस्त्रास्त्रसङ्ग्रहणम् अकरोत् | भवत्सु शूरः गुडाकेशः अपि शस्त्रसङ्ग्रहं कर्तुं पशुपतिम् उद्दिश्य तपः करोतु | इन्द्रस्य आराधनेन, शिवस्य अनुग्रहेण च दिव्यं पाशुपतास्त्रं सम्पादयतु | यशस्वी भवतु” | एवमुक्त्वा मन्त्रमेकमुपदिश्य, तपोवनं व्यासमहर्षिः निर्गतः |

कौन्तेयः इन्द्रकीलपर्वतं प्राप्य **तपस्यति** | तस्य तपोवैभवेन वनचराणां कष्टञ्जातम् | ते सर्वे **उत्सुकायन्ते** तथा इन्द्रस्य साहाय्यं प्रार्थयन्ति | इन्द्रः अर्जुनस्य तपसः परीक्षां कर्तुं प्रयतते परन्तु अर्जुनस्तु तपसः न विचलितः | अनेन इन्द्रः मनसा **सुख्यति** | सव्यसाची एकाग्रतया **सपर्यति** अतः सर्वत्र **उष्मायते** | मुनयः तापात् स्वरक्षणार्थं शिवं याचन्ते |

मूकः इति दानवः वराहरूपेण तपोविघ्नम् अकरोत् | क्रोधेन अर्जुनः वराहस्य उपरि बाणम् अक्षिपत् | युगपत् किरातरूपधारी शिवः अपि बाणम् अत्यजत् | बाणद्वयेन वराहः मृतः | किरातरूपधारी शिवः अर्जुनश्च स्वीयं बाणं नेतुं वराहसमीपम् आगतौ |

किरातार्जुनयोर्मध्ये भीकरं युद्धं प्रवृत्तम् | किरातः युद्धे **ओजायते** | तं दृष्ट्वा अर्जुनः तर्कितवान् - यत् अयं किरातः रथहीनः सैन्यहीनश्च | तथापि मम सामर्थ्यं कुण्ठितं करोति इति अर्जुनः तस्य कुशलताम् **उत्सुकयति** | अर्जुनस्य सर्वेषां दिव्यास्त्राणाम् अपि उपयोगः **विफ़लायते** | अन्ते द्वयोर्मध्ये मल्लयुद्धं सञ्जातम् | फ़ाल्गुन: तदा **उन्मनायते** |

युक्तियुक्तम् अर्जुनं सम्यक् परीक्ष्य अन्ते शिवः किरातवेषं परित्यज्य प्रत्यक्षः भवति | आश्चर्यचकितः पार्थः अति श्रद्धया शिवस्य पुरतः साष्टाङ्गं दण्डवत् प्रणामं करोति | शिवः अपि **अभिमनायते** | शत्रुवर्गस्य नाशार्थं रहस्ययुतं पाशुपतास्त्रं प्रदाय धनुर्वेदमपि **वेदापयति** | शिवस्य प्रदक्षिणं कृत्वा इन्द्रादिदेवानाम् अनुग्रहमपि सम्प्राप्य पाण्डुपुत्रः अर्जुनः स्वगृहं प्रति निवर्तयति |

By

Shyamala Heble